

# श्री काली अष्टोत्तरशतनाम स्तोत्रम्


**पंडित सुनील वत्स**

https://astrodisha.com

**Whatsapp No: 7838813444**

**Facebook: https://www.facebook.com/AstroDishaPtSunilVats**

**YouTube Channel : https://www.youtube.com/c/astrodisha**

# Sri Kali Ashtottara Shatanama Stotram

# श्री काली अष्टोत्तरशतनाम स्तोत्रम्

॥ ध्यान् ॥

खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम्।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥

॥ स्तोत्र ॥

॥ भैरव उवाच ॥

शतनाम प्रवक्ष्यामि कालिकाया वरानने।
यस्य प्रपठनाद्वाग्मी सर्वत्र विजयी भवेत्॥१॥

काली कपालिनी कान्ता कामदा कामसुन्दरी।
कालरात्रिः कालिका च कालभैरवपूजिता॥२॥

कुरुकुल्ला कामिनी च कमनीयस्वभाविनी।
कुलीना कुलकर्त्री च कुलवर्त्मप्रकाशिनी॥३॥

कस्तूरीरसनीला च काम्या कामस्वरूपिणी।
ककारवर्णनिलया कामधेनुः करालिका॥४॥

कुलकान्ता करालास्या कामार्ता च कलावती।

कृशोदरी च कामाख्या कौमारी कुलपालिनी ॥५॥

कुलजा कुलकन्या च कलहा कुलपूजिता।
कामेश्वरी कामकान्ता कुञ्जरेश्वरगामिनी ॥६॥

कामदात्री कामहर्त्री कृष्णा चैव कपर्दिनी।
कुमुदा कृष्णदेहा च कालिन्दी कुलपूजिता ॥७॥

काश्यपी कृष्णमाता च कुलिशाङ्गी कला तथा।
क्रींरूपा कुलगम्या च कमला कृष्णपूजिता ॥८॥

कृशाङ्गी किन्नरी कर्त्री कलकण्ठी च कार्तिकी।
कम्बुकण्ठी कौलिनी च कुमुदा कामजीविनी ॥९॥

कुलस्त्री कीर्तिका कृत्या कीर्तिश्च कुलपालिका।
कामदेवकला कल्पलता कामाङ्गवर्धिनी ॥१०॥

कुन्ता च कुमुदप्रीता कदम्बकुसुमोत्सुका।
कादम्बिनी कमलिनी कृष्णानन्दप्रदायिनी ॥११॥

कुमारीपूजनरता कुमारीगणशोभिता।
कुमारीरञ्जनरता कुमारीव्रतधारिणी ॥१२॥

कङ्काली कमनीया च कामशास्त्रविशारदा।
कपालखट्वाङ्गधरा कालभैरवरूपिणी ॥१३॥

कोटरी कोटराक्षी च काशी.कैलासवासिनी।
कात्यायनी कार्यकरी काव्यशास्त्रप्रमोदिनी॥१४॥

कामाकर्षणरूपा च कामपीठनिवासिनी।
कङ्गिनी काकिनी क्रीडा कुत्सिता कलहप्रिया॥१५॥

कुण्डगोलोद्भवप्राणा कौशिकी कीर्तिवर्धिनी।
कुम्भस्तनी कटाक्षा च काव्या कोकनदप्रिया॥१६॥

कान्तारवासिनी कान्तिः कठिना कृष्णवल्लभा।
इति ते कथितं देवि गुह्याद्गुह्यतरं परम्॥१७॥

प्रपठेद्य इदं नित्यं कालीनामशताष्टकम्।
त्रिषु लोकेषु देवेशि तस्याऽसाध्यं न विद्यते॥१८॥

प्रातःकाले च मध्याह्ने सायाह्ने च सदा निशि।
यः पठेत्परया भक्त्या कालीनामशताष्टकम्॥१९॥

कालिका तस्य गेहे च संस्थानं कुरुते सदा।
शून्यागारे श्मशाने वा प्रान्तरे जलमध्यतः॥२०॥

वह्निमध्ये च संग्रामे तथा प्राणस्य संशये।
शताष्टकं जपन्मन्त्री लभते क्षेममुत्तमम्॥२१॥

कालीं संस्थाप्य विधिवत्स्तुत्वा नामशताष्टकैः।
साधकः सिद्धिमाप्नोति कालिकायाः प्रसादतः ॥२२॥

**॥ इति शाक्तप्रमोदे श्रीकाल्यष्टोत्तशतनामस्तोत्रं सम्पूर्णम् ॥**

**पंडित सुनील वत्स**

Website : https://astrodisha.com

Whatsapp No : +91- 7838813444

Contact No: +91-7838813 - 444 / 555 / 666 / 777

Facebook : https://www.facebook.com/AstroDishaPtSunilVats

YouTube Channel : https://www.youtube.com/c/astrodisha

पंडित सुनील वत्स